**PAPER - 6**

# MT

**2017 .... .... 1100** **Seat No.** | | | | | | | |

**MT - SANSKRIT ENTIRE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I PAPER -VI**

**Time : 3 Hours** **(Pages 10)** **Marks : 80**

**✶ प्रथमः विभागः - गद्यम् ।**

**प्र.१. अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

अर्वाचीनकाले अन्तर्जालमेव ज्ञानकल्पवृक्षः यतः ........

(ज्ञानलालसां सम्पूर्यते अनेन / तस्मात् फलानि लभ्यन्ते ।)

II) पूर्णवाक्येन उत्तरत । १

मानवस्य कः श्रेष्ठाविष्कारः?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

अनेन तन्त्रज्ञानेन वैश्विकवार्ताः समुपलभ्यन्ते ।

प्रागैतिहासिककालतो विविधेषु संशोधनेषु अन्तर्जालमिति सर्वश्रेष्ठाविष्कारो मानवस्य । अद्ययावन्महाक्रान्तिरेषा । 'मोडेम्' नाम एकं सहायकं लघूपकरणमस्ति । तद् दूरसञ्चारतन्तुभिः सङ्गणकं संयोज्य अन्तर्जालस्य संरचना भवति। सङ्गणकानां लघुगुरुजालकानां मिथः सम्बन्धेन विश्वव्यापि यज्जालं भवति, तदेव सङ्गणकजालान्तरिक्षं खलु (Cyberspace) । अन्तर्जालमिति ज्ञानप्राप्तेरतिद्रुतगतिमार्ग एव (Information Super Highway) । अन्तर्जालं नाम विश्वव्यापिजालं (www) संज्ञापनतन्त्रज्ञानस्य महाजालं वा । जनानां जनहितार्थं जनैर्निर्मितमिदं गणतन्त्रमेव । अहो बत, नापेक्षतेऽ स्यापरिमितज्ञानार्जनस्य कृते नाणकमेकमपि । यथा प्राचीनकाले कल्पवृक्षस्तथाऽर्वाचीनकाले अन्तर्जालमेव ज्ञानकल्पवृक्षः । निमिषमात्रेणैव मनोवाञ्छितं ज्ञानलालसा वा सम्पूर्यतेऽनेन । नानाशास्त्रकलानां ज्ञानं, वैश्विकवार्ताः, विविधसंस्थानां विभागानां च संज्ञापनं, सहस्रशः ग्रन्थाः, पर्यटनार्थमुपयुक्तज्ञानमासनारक्षणं च, दूरस्थानां दर्शनं तैश्च सह संभाषणं, सामान्यज्ञानं चेति समुपलभ्यतेऽनेन तन्त्रज्ञानेन । एष आधुनिकः कल्पवृक्षःअस्मभ्यं /अस्मासु सर्वविधं संज्ञापनं वितरति । सांख्यिकीयं ज्ञानं तथा सङ्गणकयन्त्रस्य 'सॉफ्टवेअर' इति कार्यक्रमोऽपि अन्तर्जाले उपलब्धो भवति । तस्य साहाय्येन विविधविषयकाणि नानाकार्याणि विना कर्गजं शीघ्रतया सहजतया विना प्रमादं स्वल्पमानवीयबलेन कर्तुं शक्नुवन्ति सर्वे जनाः ।

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) सन्धिविग्रहं कुरुत । १

i) तैश्च - ....... + .......। (तैः + श्च। / तैः + एश्च। / तैः + च।)

ii) निमिषमात्रेणैव- ....... + .......। (निमिष + मात्रेणैव । /निमिषमात्रेण + एव । / निमिषमात्रेण + णैव ।)

II) विलोमपदानां मेलनं कुरुत । १

| | अ | ब |
|---|---|---|
| (1) | उपलब्धः | अर्वाचीनकाले । |
| (2) | प्राचीनकाले | अन्येद्युः। |
| | | अनुपलब्धः । |

III) गद्यांशतः विशेषणे चित्वा लिखत । १

i) ....... संज्ञापनम् ।

ii) ....... संशोधनेषु ।

IV) गद्यांशात् चित्वा सप्तम्यन्तशब्दौ लिखत । १

३. **स्वमतप्रकटनम् ।** २

भवान् / भवती अन्तर्जालस्य उपयोगं किमर्थं कथं च करोति? माध्यमभाषया लिखत ।

**ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

वानराः दूरं पलायिताः यतः .................

(स्वामी पलायनं कृतवान् । / स्वामी अभिमुखः जातः ।)

II) कः कं वदति। १

''अरे संन्यासिन्, अलं पलायनेन।''

III) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १

स्वामी वानराणां पृष्ठतः गच्छति ।

भारतभ्रमणसमये एकदा स्वामी विवेकानन्दमहोदयः वाराणसीं प्राप । तत्र अन्नपूर्णायाः मन्दिरं गत्वा प्रणम्य च स तां स्मरन् निवर्तमानः मार्गे किमपि विस्मयजनकमन्वभवत् । मार्गस्य एकतः आसीत् कश्चन तडागः अपरतः च उन्नता भित्तिका । तेन मार्गेण गच्छता स्वामिना ज्ञातं यत् केचन वानराः तस्य पृष्ठतः अनुगच्छन्तीति । यदा स्वामी तिष्ठति तदा तेऽपि वानराः तिष्ठन्ति यदा स चलति तदा वानराः तमनुगच्छन्तीति ज्ञातं स्वामिना । तान् मार्गाद् दूरीकर्तुं स्वामिना पद्प्रहारस्याभिनयः कृतः तदा ते तं दंष्टुमधावन् । कठिनोऽयं प्रसङ्गः इति मत्वा भीतः सः त्वरया पलायितुमारभत । वानरा अपि तम् अन्वधावन् । संभ्रान्तं स्वामिनं पलायमानं दृष्ट्वा मार्गे आसीनः कोऽपि याचकः उच्चैरभाषत, ''अरे संन्यासिन्, अलं पलायनेन । निर्भयतया तान् वानरान् अभिमुखो भव । तेन ते वानराः भीताः न त्वां पीडयिष्यन्ति ।'' तदाकर्ण्य निश्चयं कृत्वा स्वामी निश्चलः अभिमुखः जातः तेन ते भीताः वानराः दूरं पलायिताः । अथ गच्छता

कालेन न्यूयॉर्कनगर्याम् एकस्यां सभायां भाषमाणेन स्वामिना कथितोऽयं प्रसङ्गः । सोऽवदत्, ''प्रसङ्गेनानेन अवगतः मया महान् सिद्धान्तः यद् मा भैषीः आपदः । आपदाभिमुखाः भवत। तस्याः प्रतिकारं कुरुत ।''

**२. शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) सन्धिविग्रहं कुरुत। १

i) उच्चैरभाषत - ....... + अभाषत।

ii) कठिनोऽयम् - ....... + अयम्।

II) गद्यांशे विलोमपदे चिनुत । १

i) पुरतः × ....... ।

ii) चलः × ....... ।

III) विशेषण-विशेष्ययोः मेलनं कुरुत । १

| | अ | ब |
|---|---|---|
| (1) | स्वामिनम् | आसीनः । |
| (2) | याचकः | सम्भ्रान्तम् । |
| | | उन्नता । |

IV) गद्यांशे आगते केऽपि द्वे हेत्वर्थक - धातुसाधित-तुमन्त-अव्यये लिखत । १

**३. पृथक्करणम् ।** २

यथाक्रमं घटनाः लिखत ।

(i) स्वामी निश्चलः अभिमुखः जातः।

(ii) स्वामी पलायितुमारभत।

(iii) याचकः उच्चैः अभाषत।

(iv) वानराः दंष्टुमधावन्।

**क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत। १

i) एते ....... नाट्यरसाः इति व्याख्याताः। (देवताः / विशेषभावाः)

ii) ....... नाम दृढनिश्चयः । (अध्यवसायः / वीररसः)

II) पूर्णवाक्येन उत्तरत। १

वीररसस्य प्रधानः गुणः कः?

III) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

षड्रसैः भोजनम् आस्वाद्यं भवति ।

आचार्या - श्रुणु । प्रायः ख्रिस्तपूर्वं तृतीयशतके भरतमुनिना नाट्यशास्त्रं विरचितम् । एतन्नाट्यशास्त्रं नाम पञ्चमो वेद इति मन्यते बुधैः । तस्मिन् ग्रन्थे नाट्योपयुक्तानां रसानां विषये तेषां भावविषयेऽपि मुनिना कथितमस्ति ।
अदितिः - के नाम रसाः भावाश्च ? नाट्येषु रसाभिव्यक्तिः कथं संभवति ?
आचार्या - भरतमुनिः कथयति यथा महानसे षड्रसैर्युक्तं समुचितपाकक्रियाभिः सिद्धं भोजनमास्वाद्यं भवति, नाट्ये तथैव विविधभावैर्युक्ता अभिनयसहिता कलाकृतिः रसिकजनानां कृते आस्वादनीया मनोहारिणी च भवति । तस्मादेते विशेषभावाः नाट्यरसाः इति व्याख्याताः ।
अदितिः - कति रसाः ? कानि च तेषां नामानि ?
आचार्या - शृङ्गारहास्यरौद्रकरुणवीराद्भुतबीभत्सभयानकाः तथैव शान्त इति नवरसाः ख्याताः । अस्मिन् शास्त्रे सर्वरसानां देवताः वर्णाश्च वर्णिताः ।
अदितिः - आचार्ये ! अधुना विशेषेण वीररसविषये कथयतु भवती ।
आचार्या - आम् । उत्साहः वीररसस्य प्रधानगुणः । स इतरानपि उत्साहयति । अन्यः गुणः अध्यवसायः नाम दृढनिश्चयः दृढयत्नश्च । अपरः गुणः निश्चला बुद्धिः। स्थैर्यधैर्यवीर्यगर्वोत्साहपराक्रमादिप्रभावात्मकैरभिनयैः रसनिष्पत्तिः कर्तव्या । एष रसः रसिकान् प्रेरयति ।
अदितिः - आचार्ये एतत्सर्वं मनसि अवधार्यैवाभिनयं करिष्ये । अनुगृहीताहं खलु ।
आचार्या - विजयिनी विनयिनी भव ।

२. **शब्दज्ञानम् । (काः अपि ३ कृतीः कुरुत ।)**

I) विग्रहं लिखत । १

i) भावाश्च - ....... + .......। ii) रसैर्युक्तम् - ....... + .......।

II) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत। १

i) 'वर्णाः' नाम रङ्गाः अक्षराणि च ।

१. वर्णमालायां कति वर्णाः सन्ति? अत्र वर्णाः - ....... । (रङ्गाः / अक्षराणि)

२. इन्द्रचापे सप्त वर्णाः सन्ति । अत्र वर्णाः - ....... । (रङ्गाः / अक्षराणि)

III) गद्यांशतः २ विशेषणे चित्वा लिखत । १

[ ] — कलाकृतिः — [ ]

IV) गद्यांशे आगते २ सप्तम्यन्तपदे ........ , ........ । १

३. **पृथक्करणम् ।** २




**✶ द्वितीयः विभागः - पद्यम् ।**

**प्र.२. अ) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **पृथक्करणम् ।** २




मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः
पात्रं यत् सुखदुःखयोः सह भवे न्मित्रेण तद्दुर्लभम् ।
ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुला -
स्ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां विपत् ॥१॥
तत्सूनुः क्षितिपालमौलिमुकुटव्याघृष्टपादाम्बुजः ।
सत्कीर्तिर्विलसत् प्रतापवशगामित्रः क्षितीशेश्वरः ॥२॥
यस्याहर्निशमानतिर्गुणगणातीते परे ब्रह्मणि ।
श्रीमानेदलभूपतिर्विजयते भूपालचूडामणिः ॥३॥

२. **माध्यमभाषया लिखत ।** २

द्वितीय तथा तृतीयश्लोकस्य आधारेण एदलशाहभूपस्य विषये माध्यमभाषया लिखत ।

**प्र.२. ब) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. शब्दज्ञानम् ।**

I) चतुर्थपदं लिखत । १

i) भ्रमरः : मधुकरः :: कमलम् : ....... ।

ii) राजा : नृपः :: वंशः : ....... ।

II) मञ्जूषातः योग्यविशेषणे चित्वा लिखत । १

[ ] — गजनीनरेशः — [ ]

(वंशे, कुलावतंसः, मलिकाभिधानः, उदारचेताः)

समुपागतवति दैवादवहेलां कुटज मधुकरे मा गाः।
मकरन्दतुन्दिलानामरविन्दानामयं महामान्यः ॥१॥
वंशेऽथ तस्मिन् किल फारुकेन्द्रो बभूव राजा मलिकाभिधानः ।
तस्याभवत् सूनुरुदारचेताः कुलावतंसो गजनीनरेशः ॥२॥
तस्मादभूत् केसरखानवीरः पुनस्तदीयो हसनक्षितीशः ।
तस्मादभूदेदलशाहभूपः पुत्रोऽभवत् तस्य मुबारखेन्द्रः ॥३॥

**२. अन्वयपूर्तिः ।** २

हे कुटज, ........ समुपागतवति मधुकरे ........ मा गाः । ........ मधुकरः मकरन्दतुन्दिलानाम् ........ महामान्यः अस्ति ।

**क) द्वे सुभाषिते शुद्धे पूर्णे च लिखत ।** ४

i) यो यमर्थं ........ निवर्तते ॥

ii) अङ्गेन ........ न रात्रिः ॥

iii) अणुपूर्वं ........ कुरु ॥

**ड) वृत्तनाम चिनुत ।** १

महीपतेः सन्ति न यस्य पार्श्वे कवीश्वरास्तस्य कुतो यशांसि ।
भूपाः कियन्तो न बभूवरुर्व्यां नामापि जानाति न कोऽपि तेषाम् ॥

अस्य श्लोकस्य वृत्तनाम ......... इति । ( गीतिः / इन्द्रवज्रा / उपेन्द्रवज्रा)

## ✶ तृतीयः विभागः - स्थूलवाचनम् ।

**प्र.३. अ) गद्यांशं पठित्वा निर्दिष्टे कृती कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

I) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यं लिखत । १

संस्कृतवाक् राष्ट्रभाषा भवतु इति सर्वेषां सांसदानाम् इच्छा ।

II) एकपदेन उत्तरं लिखत । १

भीमरायस्य का नवा धुर्?

लब्धे च स्वातन्त्र्ये नेहरुणा मन्त्रिमण्डलं रचितम् ।
विधिमन्त्रिपदे धीमान् नियोजितः श्रीभीमरायः ।।१।।
घटनासमितिप्रमुखो बभार भव्यां नवां धुरं भीमः ।
श्रमभारं नागणयन्नित्यं निरतोऽपि निजकार्ये ।।२।।
प्रियसंस्कृतवाग्भीमः कामं जानन् विबुधवाङ्महत्ताम् ।
ऐच्छत् तां स्थापयितुं हिन्दीव राष्ट्रवाचः पदे ।।३।।
दलितमहासङ्घस्य च कार्यसभायां तदा भीमरायः ।
प्रस्तावोपन्यासं कृतवान् गीर्वाणवाग्विषयम् ।।४।।
संस्कृतवाङ्माहात्म्यं विशदीकुर्वंस्तदा भीमरायः ।
प्रोवाच संस्कृता वाक् भारतीयसंस्कृतेर्मूलम् ।।५।।
नैकगिरां प्रसवित्री भिन्नप्रान्तीयभारतीयानाम् ।
मान्या सदैव विदुषाम् अर्हति नो राष्ट्रभाषात्वम् ।।६।।
कैश्चित्सांसदमुख्यैः संस्कृतवाग् भवतु राष्ट्रभाषेति ।
प्रस्ताव उपन्यस्तो भीमस्तेषामभूत् प्रमुखः ।।७।।
मैत्रोपनाम विद्वाञ् ज्ञातुं भीमस्य संस्कृतज्ञानम् ।
पप्रच्छ भीमरायं संस्कृतवाण्यैव निजशङ्काः ।।८।।

**२. पृथक्करणम् ।** २

(संस्कृतविषयकः प्रस्तावः, विधिमन्त्रिपदे नियुक्तिः, मन्त्रिमण्डलरचना, घटनासमित्याः कार्यम् ।)

| | | | | | | |
|---|---|---|---|---|---|---|
|  | → |  | → |  | → |  |

## ✶ चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४. यथानिर्देशं कृतीः कुरुत । (केवलं ३ उपप्रश्नाः लेखनीयाः ।)**

**अ) परिच्छेदपूर्तिः ।**

मञ्जूषातः उचितशब्दान् चित्वा परिच्छेदं पुनर्लिखत । ५

शब्दानां माधुर्यं स्वर्गं प्रापयति ...... च नरके पातयति। एक एव शब्दः जीवनं विभूषयेत् उतान्यः शब्दः जीवनं नाशयेत्। एकदा द्वयोः धनिनोः मध्ये ...... उत्पन्नः। तौ न्यायालयं गतौ। तयोरेकः अचिन्तयदहं लक्षं रूप्यकाणि स्यूते स्थापयित्वा न्यायाधीशस्य गृहं गतवान्। न्यायाधीशस्तस्य ...... ज्ञात्वा क्रुद्धोऽभवत्। धनिकोऽवदत् भोः, मत्सदृशाः लक्षरूप्यकाणां दातारः दुर्लभाः एव। न्यायाधीशः अवदत् लक्षरूप्यकाणां दातारः कदाचिदन्येऽपि भवेयुः परं लक्षरूप्यकाणां ...... मत्सदृशाः अन्ये विरला एव। अतः कृपया गच्छतु। न्यायस्थानं मलिनं मा कुरु। लज्जितः धनिकः धनस्यूतं ...... ततः निर्गतः।

(आगत्य, वयस्यैः, प्रायतत, निर्दयेन, प्रार्थ्य)

**ब) ३ पर्यायेषु १ विषयम् अधिकृत्य पञ्चवाक्यात्मकं निबन्धं लिखत ।** ५

१. मद्यपानं महापापम् । २. दूरदर्शनम् । ३. मैत्रीदिनोत्सवः ।

**क) संस्कृतानुवादः ।**

८ वाक्येषु ५ वाक्यानां संस्कृतभाषया अनुवादं कुरुत । ५

i) Tell your brother's name.
ii) I saw a tiger in the dense forest.
iii) Lion is the king of beasts.
iv) Valour is the cause of fame.
v) We will sit in the shadow of the tree.
vi) Who told you this?
vii) Anger pacifices by soft speech.
viii) At the beginning of drama the actor calls his wife.

**ड) वाक्यरचना ।**

i) धातूनां प्रयोगः - ४ धातुषु ३ धातून् प्रयुज्य ३ वाक्यानि संस्कृतभाषया लिखत । ३

१. धातु सम् + ऋ (१ प.प.) २. धातु याच् (१ आ.प.)
३. धातु रुच् (१ आ.प.) ४. धातु कथ् (१० उ.प.)

ii) अशुद्धिसंशोधनम्-अव्ययानि प्रयुज्य रचितेषु ४वाक्येषु २वाक्ययोः अशुद्धिसंशोधनं कुरुत । २

१. विद्यालयस्य बहिः मार्गः अस्ति ।
२. नद्याः अभितः क्रीडाङ्गणं वर्तते ।
३. सुरेशः वाद्यवादनात् प्रवीणः ।
४. अलं विषादम् ।

## ★ पञ्चमः विभागः - व्याकरणम् - उपयोजनकौशल्यम् ।

प्र.५. यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)

अ) क्रियापदरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।) ३

तृतीयपुरुष-एकवचनस्य रूपाणि लेखनीयानि ।

| धातुः | आज्ञार्थः | वर्तमानकालः | परोक्षः भूतकालः | विध्यर्थः | द्वितीयः भविष्यकालः | प्रथमः भूतकालः |
|---|---|---|---|---|---|---|
| अस् (२ प.प.) | ...... | अस्ति | ...... | ...... | ...... | आसीत् |
| ग्रह् (९ आ.प) | गृह्णीताम् | ...... | ...... | ...... | ग्रहीष्यते | ...... |

ब) नाम-सर्वनामरूपैः आवलिपूरणम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।) ३

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| षष्ठी | राज्ञः | ...... | ...... |
| प्रथमा | ...... | ...... | श्रियः |
| सप्तमी | अस्मिन् | ...... | ...... |
| द्वितीया | ...... | ...... | इमाः/एनाः |

क) धातुसाधित-विशेषणैः कोष्ठकपूर्तिं कुरुत । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।) ३

| कर्मणि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्तरि भूतकालवाचक-धातुसाधित-विशेषणम् | कर्मणि विध्यर्थक-धातुसाधित-विशेषणम् | कर्तरि वर्तमानकालवाचक-धातुसाधित-विशेषणम् |
|---|---|---|---|
| | | | |

(आस्वादनीया, उक्तम्, विलसत्, आदिष्टः, अभिनेतव्या, गवेषमाणाः, गतवन्तः, कथितवती)

ड) समासाः ।

विग्रहवाक्यानां समासनामभिः सह मेलनम् । (८ पर्यायेषु ६ पर्यायाः लेखनीयाः ।) ३

| | अ | ब |
|---|---|---|
| i) | शीतः ऋतुः, तस्मिन् । | इतरेतर द्वन्द्व समास |
| ii) | इष्टम् अनतिक्रम्य। | उपपद तत्पुरुष समास |
| iii) | सुखं च दुःखं च, तयोः । | बहुव्रीहि समास |
| iv) | न मर्त्याः, तैः। | पञ्चमी तत्पुरुष समास |
| v) | हितं करोति इति । | कर्मधारय समास |
| vi) | अध्ययनाय इदम् । | नञ् तत्पुरुष समास |
| vii) | पक्षिणः मित्राणि येषां ते । | चतुर्थी तत्पुरुष समास |
| viii) | इतरेभ्यः इतरम् । | अव्ययीभाव समास |

**इ) वाक्यपरिवर्तनम् । (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।) ३**

i) भगवता तस्मै नूतनचीवराणि दत्तानि । (प्रयोगं परिवर्तयत ।)

ii) भवान् अस्माकं जीर्णकुटीम् आगच्छतु । (भवान् स्थाने 'त्वं' योजयत ।)

iii) सोमशर्मणा पृष्टे सति अनन्तभट्टो व्याधयः कीदृशं पीडयन्ति एतत् स्पष्टीकुर्वन्नासीत् । (सतिसप्तमीरचनां निष्कासयत ।)

vi) राजा काव्यं शृणोति । ('कविः' इति प्रयोजककर्तृपदं उपयुज्य वाक्यं पुनर्लिखत ।)

**फ) सङ्ख्यावाचकाः । (रिक्तस्थानपूर्तिः ।) (४ पर्यायेषु ३ पर्यायाः लेखनीयाः ।) ३**

i) चकितचकितः सोमशर्मा अपृच्छत्, "....... वैद्याः ?" (6)

ii) तेषाम् ....... गणस्य प्रमुखः आसीत् लेरसियानामा । (1)

iii) शाकुन्तलस्य ....... अङ्कः अतीव सुन्दरः अस्ति । (4th)

iv) सप्ताहस्य ....... अहं मन्दिरं गच्छामि । (thrice)

## ✶ षष्ठः विभागः - अनुवादकौशल्यम् ।

**प्र.६. अ) संस्कृतगद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत । ४**

एकदाः एकः नवोदितः लेखकः सुप्रसिद्धं नाटककारं राम - गडकरी - महोदयं मिलितुम् आगतः। गडकरी महोदयस्य नाटकानां काव्यप्रतिभायाः विपुलां प्रशंसा कृत्वा स अवदत्, ''भवतः साहित्यं पठित्वा अहमपि भवत्सदृशं किमपि लेखितुम् इच्छामि। भवतः मार्गदर्शनम् अहं लभेय इति आशा अस्ति। तावत्प्रथमं किं कुर्याम् अहम् ? ''पुनर्विचारम्'', इति गडकरी-महोदयेन उत्तरितम्।

**ब) संस्कृतपद्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत । ४**

एकोऽपि रोपितो वृक्षः पुत्रकार्यकरो भवेत् ।
देवान्प्रसूनैः प्रीणाति छायया चातिथिं तथा ।।
फलैर्मनुष्यान्प्रीणाति नारक्यं नास्ति पादपे ।
अपि पुष्पफलैर्हीने द्रुमे पान्थस्य विश्रमः ।।

**क) संस्कृतनाट्यांशं पठित्वा माध्यमभाषया अनुवादं कुरुत । ४**

प्रियंवदा – हा धिक् हा धिक् ! अप्रियमेव संवृत्तम्। कस्मिन्नपि पूजार्हेऽपराद्धा शून्यहृदया शकुन्तला। (पुरोऽवलोक्य) एष दुर्वासाः सुलभकोपी महर्षिः। तथा शप्त्वा दुर्वारया गत्या प्रतिनिवृत्तः।

अनसूया – कोऽन्यो हुतवहाद्दग्धुं प्रभवति। गच्छ पादयोः प्रणम्य निवर्तयैनं यावदहमर्घोदकमुपकल्पयामि।

प्रियंवदा – तथा। (इति निष्क्रान्ता।)

**Best of Luck**